योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ००६

षष्ठः सर्गः ६

श्रीवसिष्ठ उवाच ।

भूय एव महाबाहो श्रृणु मे परमं वचः ।

यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ।। १

भेदमभ्युपगम्यापि श्रृणु बुद्धिविवृद्धये ।

भवेदल्पप्रबुद्धानामपि नो दुःखिता यथा ।। २

यस्याज्ञानात्मनोऽज्ञस्य देह एवात्मभावना ।

उदितेति रुषैवाक्षरिपवोऽभिभवन्ति तम् ।। ३

यस्य ज्ञानात्मनो ज्ञस्य सत्येवात्मनि संस्थितिः ।

संतुष्ट्यैवाक्षसुहृदो न घ्नन्ति तमनिन्दितम् ।। ४

पदार्थे स्फुरतो यस्य न स्तुतिर्निन्दनादृते ।

स देहं देहदुःखार्थमादत्ते केन हेतुना ।। ५

नात्मा शरीरसंबन्धी शरीरमपि नात्मनि ।

मिथो विलक्षणावेतौ प्रकाशतमसी यथा ।। ६

सर्वैर्भावविकारैस्तु नित्योन्मुक्तस्त्वलेपकः ।

नात्मास्तमेति भगवान्न चोदेति सदोदितः ।। ७

जडस्याज्ञस्य तुच्छस्य कृतघ्नस्य विनाशिनः ।

शरीरकोपलस्यास्य यद्भवत्यस्तु तत्तथा ।। ८

आदत्ते तत्कथं नित्यं चिन्मयत्वं सदोदितम् ।

ययोरेकपरिज्ञाने जडतैवाऽपरस्थिता ।। ९

तयोः कीदृग्विधा भूता समानसुखदुःखता ।

यौ समौ समधर्माणौ न कदाचन तौ कथम् ।। १०

यावप्यसक्तावन्योन्यं मिथः संनमितौ कथम् ।

कथं स्थूलोऽणुरूपः स्यादणुः स्थूलः कथं भवेत्।। ११

एकोदये द्वितीयस्य न सत्ता दिनरात्रयोः ।

ज्ञानं नाज्ञानतामेति च्छाया नायाति तापताम् ।। १२

सद्ब्रह्म नासद्भवति विचित्रास्वपि दृष्टिषु ।

मनागपि न संश्लेषः सर्वगस्यापि देहिनः ।। १३

देहेन देहगस्यापि कमलस्येव वारिणा ।

मनागपि न संश्लेषो ब्रह्मणो देहसत्तया ।। १४

तद्गतस्याप्यतद्वृत्तेरम्बरस्येव वायुतः ।

जरा मरणमापच्च सुखदुःखे भवाभवौ ।। १५

मनागपि न सन्तीह तस्मात्त्वं निर्वृतो भव ।

स्थितो देहतयाप्युच्चैः पातोत्पातमयो भ्रमः ।। १६

दृश्यते केवलं ब्रह्मण्यप्सु वीचिचयो यथा ।

आत्मसत्तोपजीवित्वादात्मानुभवतीह हि ।। १७

देहयन्त्रं पयःसत्तामात्रादूर्मिमिव स्थितम् ।

आधारस्पन्दनेनाङ्ग यथा क्षोभो न वा भवः ।। १८

सूर्यादेः प्रतिबिम्बस्य तथा देहेन देहिनः ।

सम्यग्दृष्टे यथाभूते वस्तुन्येवाभिजायते ।। १९

स्थितिर्देहमयो ज्ञानविभ्रमो लयमेति च ।

देहदेहवतोर्ज्ञानाद्यथाभूतार्थयोः स्थितिः ।। २०

सत्तासत्तात्मिकोदेति दीपाद्दीपपदार्थयोः ।

असम्यग्दर्शिनो देहस्यावर्तपरिवर्तनैः ।। २१

अन्तःशून्याः स्फुरन्तीह ते मोहार्जुनपादपाः ।

अपर्यालोचितात्मार्था अपरामृष्टसंविदः ।। २२

स्पन्दन्ते चेतितोन्मुक्तास्तृणवन्मूढबुद्धयः ।

अनास्थादितचित्तत्वाज्जडाः सर्वे खवायुभिः ।। २३

यत्र तत्रोदिताक्रान्ता रटन्ति प्रस्फुरन्ति च ।

तृणकाष्ठादिकं सर्वमाहरन्ति त्यजन्ति च ।। २४

सशब्दस्पर्शरूपाढ्यास्तरङ्गतरलाङ्गकाः ।

जडाः सन्तः स्फुरद्रूपा भृशं स्फाररसासवाः ।। २५

सविहारागमापाया महौघा इव दुर्धियः ।

सर्वेषामेव चैतेषां स्थितैवैषा चिदव्यया ।। २६

किंत्वबोधवशादस्याः परां कृपणतां गता ।

श्वाससंततयो ह्यज्ञाल्लोहकारदृतेर्यथा ।। २७

स्पन्दमात्रार्थमेवाशु दृश्यन्ते नार्थकारिणः ।

तर्जनं गर्जनं मूढाद्धनुर्दण्डगुणादिव ।। २८

श्रूयते मरणायैव चिद्बोधपरिवर्जितम् ।

फलभोगोऽपि यो मूढात्तदरण्यतरोरिव ।। २९

तस्मिन्विश्रमणं यत्तच्छिलाफलहके यथा ।

तेन यत्संगमः स स्यात्स्थाणुना भुवि जङ्गले ।। ३०

तदर्थं यत्कृतं किंचित्तद्व्योम लकुटैर्हतम् ।

तस्मिन्यदधमे दत्तं तत्त्यक्तं किं न कर्दमे ।। ३१

तेन सार्धं कथा यत्तत्कौलेयाह्वानमम्बरे ।

अज्ञानमापदां निष्ठा का हि नापदजानतः ।। ३२

इयं संसारसरणिर्वहत्यज्ञप्रमादतः ।

अज्ञस्योग्राणि दुःखानि सुखान्यपि दृढानि च ।। ३३

पुनःपुनर्निवर्तन्ते युगं प्रत्यचला इव ।

शरीरधनदारादावास्थां समनुबध्नतः ।। ३४

इदं दुर्दुःखमज्ञस्य न कदाचन शाम्यति ।

अनात्मनि शठे देहे आत्मभावमुपेयुषि ।। ३५

असद्बोधमयी माया कथं नामापि नश्यति ।

दुर्भावस्वञ्चितधियो वस्तुन्यन्धस्य दुर्मतेः ।। ३६

अवस्तुनि सनेत्रस्य लुठतश्च पदे पदे ।

विषमुत्पद्यते चन्द्रादामोदः कुसुमादिव ।। ३७

कण्टकश्चैति पयसो दूर्वाङ्कुर इव स्थलात् ।

देहशाल्मलिभोगिन्यो मनोमातङ्गश्रृंखलाः ।। ३८

अज्ञस्याशाः प्रसूयन्ते सुकृष्टादिव शालयः ।

नरकश्रीरिहाज्ञानं दुष्कृतव्यालवेष्टितम् ।। ३९

परिपालयति प्रीता मयूरी वारिदं यथा ।

नेत्रलोलालिनीलोला स्फुरिताधरपल्लवा ।। ४०

मूर्खार्थमेव विकसत्यङ्गना विषवल्लरी ।

अज्ञस्य हृदि सद्भूमावेव पेलवपल्लवा ।। ४१

विद्यते पतगच्छायो रागविद्रुमदुर्द्रुमः ।

तरुच्छदलसद्भूमः शस्त्रजालरदोल्मुकः ।। ४२

ज्वलति द्वेषदावाग्निर्हृन्मरौ कायतापदः ।

अज्ञमात्सर्यमनसि परापवदनच्छदा ।। ४३

ईर्ष्याकमलिनी चिन्ताषट्पदा विलसत्यलम् ।

प्रतिजन्मप्रमृष्टोग्रदुःखकल्लोलविभ्रमम् ।। ४४

जडमेव समभ्येति पुनर्मरणवाडवः ।

जन्म बाल्यं व्रजत्येतद्यौवनं युवता जराम् ।। ४५

जरा मरणमभ्येति मूढस्यैव पुनःपुनः ।

जगज्जीर्णारघट्टेऽस्मिन्रज्ज्वा संसृतिरूपया ।। ४६

मज्जनोन्मज्जनैरज्ञो यन्त्रे कलशतां गतः ।

यदेव गोष्पदापूरं ज्ञधियः पेलवं जगत् ।। ४७

तदेवापारपर्यन्तमगाधममहात्मनः ।

धियोऽदृश इवाज्ञस्य दीर्घं जठरकोटरात् ।। ४८

न प्रयान्त्यपरं पारं विहङ्ग्यः पञ्जरादिव ।

भावमात्रपरावृत्तवासनाभारनाभयः ।। ४९

स्पष्टीकर्तुं न शक्यन्ते जन्मचक्रस्य नेमयः ।

अज्ञेनेन्द्रियगृध्रार्थं रागान्मृगयुणा तनुः ।। ५०

संसारारण्य आस्तीर्णा दूरादामिषपिण्डवत् ।

भूतशैलमयी दृष्टिर्मृन्मांसलवमात्रिका ।। ५१

मोहात्संलक्ष्यते चित्रपदार्थानन्तरञ्जनः ।

जयत्यनल्पसंकल्पकल्पनाकल्पपादपः ।। ५२

अज्ञानात्प्रसृता यस्माज्जगत्पर्णपरम्पराः ।

यस्मिंस्तिष्ठन्ति राजन्ते विशन्ति विलसन्ति च ।। ५३

विचित्ररचनोपेता भूरिभोगिविहङ्गमाः ।

यत्र जन्मानि पर्णानि कर्मजालं च कोरकम् ।। ५४

फलानि पुण्यपापानि मञ्जर्यो विभवश्रियः ।

अज्ञानेन्दूदये नैता योषिदोषधयः स्फुटम् ।। ५५

संसारवनखण्डेऽस्मिन्परां शोभामुपागताः ।

जन्मजालकलापूर्णस्तमःकालकृतोदयः ।। ५६

शून्योदितात्मा दोषेशो जयत्यज्ञानचन्द्रमाः ।

अज्ञानेन्दोः प्रसादेन वासनामृतशालिना ।। ५७

तर्पिताशाचकोरेण चित्तरत्नरसैषिणा ।

राजहंसविलासिन्यः प्रालेयशिशिराङ्गिकाः ।। ५८

भान्ति कान्ताकुमुद्वत्यो लोललोचनषट्पदाः ।

धम्मिल्लतिमिरोल्लासा लसत्पाण्डुपयोधराः ।। ५९

रामारजन्यो राजन्ते तन्मौर्ख्येण विजृम्भितम् ।। ६०

आपातमात्रमधुरत्वमनर्थसत्त्व-

माद्यन्तवत्त्वमखिलस्थितिभङ्गुरत्वम् ।

अज्ञानशाखिन इति प्रसृतानि राम

नानाकृतीनि विपुलानि फलानि तानि ।। ६१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देवदूतोक्ते मोक्षोपायेषु निर्वाणप्रकरणे पू० मोहमाहात्म्यं नाम षष्ठः सर्गः